# १०. सन्मित्रम् ।

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. वैशाली नाम पुरीं कः प्रशशास? (K)
2. सेनजिद्राजस्य सचिवस्य नाम किम् ? (K)
3. राजा केन यशः प्राप्नोत् ? (K)

4. शास्त्रालापः कुत्र प्रावर्तत ? (K)

5. महीपालस्य पूजा कुत्र सम्भवति? (K)

6. देवव्रतस्य कति मित्राणि आसन् ? (K)

7. सन्मित्रस्य नाम किम् ? (K)

8. सोमदेवः कस्य मित्रम् आसीत्? (K)

9. जागतिका व्यक्तयः कथं व्यवहरन्ति ? (K)

10. चन्द्रधरस्य गृहे कः क्षमाम् अयाचत ? (K)

**II दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. सेनजित् तथा देवव्रतस्य सम्भाषणं लिखत । (A)
2. देवव्रतेन अनुभूतां कष्टपरम्परां वर्णयत । (A)
3. देवव्रत-चन्द्रधरयोः मैत्रीं वर्णयत । (A)
4. देवव्रतस्य राज्यात् बहिर्गमनकारणं विशदयत । (A)

**III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. महीपालस्य पूजा स्वदेशे सम्भवति । (C)
2. प्रदर्श्यतां तावत् स्वविषयकं प्रामाण्यम् । (C)
3. राजानमन्तरा न विद्वान् सपर्यामुपभोक्तुम् अर्हति । (C)
4. नाहं विस्मरामि तवोपकारम् । (C)
5. अहो धिङ् माम् इमौ स्वार्थिनौ सखायौ । (C)
6. समयानुसारमेव व्यवहरन्ति जागतिका व्यक्तयः । (C)
7. मित्रमेकमेव भवति प्रधानं जगतीतले । (C)
8. नूनमस्ति अनर्थपरंपरा खल्वियं जगतीतले । (C)
9. आः ममेदृशी प्रज्ञा ? (C)

**IV मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. राजा ससुखं सानन्दं कालं............। (S)
2. प्रदर्श्यतां तावत् स्वविषयकं ......... । (S)
3. नाभिलषन्ति इतरेषामपि ..... । (S)
4. नूनमहं विरोधेऽपि राज्ञः.......आचरिष्यामि । (S)
5. मित्रदर्शनात् ....... सन्तोषः तु वर्णनातीतम् । (S)

( भवत्साहाय्यम्, चन्द्रधरस्य, यापयति स्म, प्रामाण्यम्, कल्याणम् )

**********************